# .. bhagavatstotramvAsukinIlamate ..

# ॥ ભગવત્સ્તોત્રં વાસુકિકૃત ॥

## Document Information

Text title : bhagavatstotramvAsukinIlamate

File name : bhagavatstotramvAsukinIlamate.itx

Location : doc_vishhnu

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : NA

Proofread by : NA

Latest update : March 26, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ ભગવત્સ્તોત્રમ્વાસુકિનીલમતે ॥

ભક્ષ્યમાણેષુ નાગેષુ ગરુડેન મહાત્મના ।
વાસુકિઃ શરણં પ્રાયાદ્દેવદેવં જનાર્દનમ્ ॥ ૧॥

વાસુકિરુવાચ ।
નમોઽસ્તુ તે દેવવરાપ્રમેય નમોઽસ્તુ તે શાર્ઙ્ગગદાસિપાણે ।
નમોઽસ્તુ તે દાનવનાશનાય નમોઽસ્તુ તે પદ્મજસંસ્તુતાય ॥ ૨॥

નમોઽસ્તુ તે લોકહિતે રતાય નમોઽસ્તુ તે વાસવનન્દનાય ।
નમોઽસ્તુ તે ભક્તવરપ્રદાય નમોઽસ્તુ તે સત્પથદર્શનાય ॥ ૩ ॥

ઉન્નિદ્રનીલનલિનદ્યુતિચારુવર્ણં સન્તપ્તહાટકનિભે વસને વસાનમ્ ।
સદ્રત્નચુમ્બિતકિરીટવિરાજમાનં દામોદરં સુરગુરું પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૪॥

ક્ષીરોદકન્યાર્પિતપાદપદ્મં હરિં પ્રપન્નોઽસ્મ્યનઘં વરેણ્યમ્ ।
પરં પુરાણં પરમં સનાતનં તમાદિદેવં પ્રણતોઽસ્મિ ભક્ત્યા ॥ ૫॥

ફણાવલીરત્નસહસ્રચિત્રે શેષસ્ય ભોગે વિમલે શયાનમ્ ।
તમાદિદેવં પુરુષં પુરાણં નમામિ ભક્ત્યા પરયા રમેશમ્ ॥ ૬॥

ભૂમેઃ સમુદ્ધારણબદ્ધચિત્તો દૈત્યેન્દ્રાનર્ઘાત વિધાનદક્ષઃ ।
લોકસ્ય સર્વસ્ય તુ ચિન્તયાનઃ શુભાશુભં રક્ષ મમાઽદ્યદેવ ॥ ૭॥

ખગપતિરતિભીમચણ્ડવેગો મમ કુલમાશુ વિનાશયત્યનન્ત ।
કરુમુનિવરસંસ્તુતાદ્યરક્ષાં પવનબલં વિનિવારયસ્વ તાર્ક્ષ્યમ્ ॥ ૮॥

ઇતિ નીલમતે વાસુકિકૃત ભગવત્સ્તોત્રમ્ ॥

From Nilamata Purana verses 97-104
NA

.. bhagavatstotramvAsukinIlamate ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*